শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# ॥শ্রী ভীষ্মস্তুতিঃ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রী ভীষ্মস্তুতিঃ ॥

শ্রীভীষ্ম উৱাচ
ইতি মতিরুপকল্পিতা ৱিতৃষ্ণা
ভগৱতি সাত্বতপুঙ্গৱে ৱিভূম্নি।
স্বসুখমুপগতে ক্বচিদ্বিহর্তুং
প্রকৃতিমুপেযুষি যদ্ভৱপ্রৱাহঃ॥ ১ ॥

ত্রিভুৱনকমনং তমালৱর্ণং
রৱিকরগৌরৱরাম্বরং দধানে।
ৱপুরলককুলাৱৃতাননাব্জং
ৱিজযসখে রতিরস্তু মেনৱদ্যা॥ ২ ॥

যুধি তুরগরজোৱিধূম্রৱিষৱক-
কচলুলিতশ্রমৱার্যলঙ্কৃতাস্যে।
মম নিশিতশরৈর্ৱিভিদ্যমান-
ত্বচি ৱিলসতকৱচেস্তু কৃষ্ণ আত্মা॥ ৩ ॥

সপদি সখিৱচো নিশম্য মধ্যে
নিজপরযোর্বলযো রথং নিৱেশ্য।
স্থিতৱতি পরসৈনিকাযুরক্ষ্ণা
হৃতৱতি পার্থসখে রতির্মমাস্তু॥ ৪ ॥

ৱ্যৱহিতপৃতনামুখং নিরীক্ষ্য
স্বজনৱধাদ্বিমুখস্য দোষবুদ্ধ্যা।
কুমতিমহরদাত্মৱিদ্যযা যঃ
চরণরতিঃ পরমস্য তস্য মেস্তু॥ ৫ ॥

স্বনিগমমপহায মতপ্রতিজ্ঞা-
মৃতমধিকর্তুমৱপ্লুতো রথস্থঃ।
ধৃতরথচরণোভ্যযাচ্চলদ্গু-
র্হরিরিৱ হন্তুমিভং গতোত্তরীযঃ॥ ৬ ॥

www.prapatti.com

শিতৱিশিখহতো ৱিশীর্ণদংশঃ
    ক্ষতজপরিপ্লুত আততাযিনো মে।
প্রসভমভিসসার মদ্বধার্থং
    স ভৱতু মে ভগৱান্ গতির্মুকুন্দঃ॥ ৭॥

ৱিজযরথকুটুম্ব আত্ততোত্রে
    ধৃতহযরশ্মিনি তচ্ছ্রিযেক্ষণীযে।
ভগৱতি রতিরস্তু মে মুমূর্ষো-
    র্যমিহ নিরীক্ষ্য হতা গতাঃ স্বরূপম্॥ ৮॥

ললিতগতিৱিলাসৱল্গুহাস-
    প্রণযনিরীক্ষণকল্পিতোরুমানাঃ।
কৃতমনুকৃতৱত্য উন্মদান্ধাঃ
    প্রকৃতিমগন্ কিল যস্য গোপৱধ্ৱঃ॥ ৯॥

মুনিগণনৃপৱর্য সঙ্কুলেন্ত-
    সসদসি যুধিষ্ঠির রাজসূয এষাম্।
অর্হণমুপপেদ ঈক্ষণীযো
    মম দৃশিগোচর এষ আৱিরাত্মা॥ ১০॥

তমিমমহমজং শরীরভাজাং
    হৃদি হৃদি ধিষ্ঠিতমাত্মকল্পিতানাম্।
প্রতিদৃশমিৱ নৈকধার্কমেকং
    সমধিগতোস্মি ৱিধূতভেদমোহঃ॥ ১১॥

সূত উৱাচ
কৃষ্ণ এৱং ভগৱতি মনোৱাগদৃষ্টিৱৃত্তিভিঃ।
আত্মন্যাত্মানমাৱেশ্য সোন্তঃ শ্বাস উপারমত্॥ ১২॥

॥ ইতি শ্রী ভীষ্মস্তুতিঃ সমাপ্তা॥